# Ganesha Stuti by Mudgala

# ગણેશસ્તુતિઃ મુદ્ગલકૃતા

## Document Information

```
Text title : Ganesha Stuti by Mudgala

File name : gaNeshastutiHmudgalakRRitA.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : NA

Proofread by : NA

Description/comments : Mudgalapurana, Khanda 1, Adhyaya 21

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# ગણેશસ્તુતિઃ મુદ્ગલકૃતા

શ્રીગણેશાય નમઃ ।
શૌનક ઉવાચ ।
કથં સ્તુતિઃ કૃતા તેન ગણેશસ્ય મહાત્મનઃ ।
તાં મે વદ મહાભાગ સર્વજ્ઞોઽસિ મતો બુધૈઃ ॥ ૧॥

સૂત ઉવાચ ।
ભવતે કથયિષ્યામિ ભાવયુક્તેન ચેતસા ।
સ્તુતિં કૃતાં ગણેશસ્ય મુદ્ગલેન ચ તાં મુને ॥ ૨॥

મુદ્ગલ ઉવાચ ।
કિં સ્તૌમિ ત્વાં ગણાધ્યક્ષ વેદૈઃ સ્તોતું ન શક્યતે ।
બ્રહ્માદિભિશ્ચ યોગીન્દ્રૈર્યથામતિ ચ વચ્મિ ભોઃ ॥ ૩॥

ત્વદ્દર્શનપ્રભાવેણ શક્તોઽસ્મિ ન ચ સંશયઃ ।
ત્વદનુગ્રહતઃ સર્વે સ્તોતું શક્તા ભવન્તિ વૈ ॥ ૪॥

નમસ્તે ગણેશાય સર્વાદિભૂમ્ને પરેષાં પરેશાય વેદાતિગાય ।
પરં માયિને માયિનાં મોહદાત્રે હ્યગણ્યાય ગણ્યાય તે વૈ નમસ્તે ॥ ૫॥

પુરાણાદિશાસ્ત્રૈઃ સદા સંસ્તુતાય શિવાદ્યૈઃ સુરેન્દ્રૈર્નમસ્તે સ્તુતાય ।
અનાદ્યન્તમધ્યાદિભેદૈર્વિહીનાય નાનામયાયાસ્તુ સર્વેશ્વરાય ॥ ૬॥

નમો લક્ષવેદાષ્ટયોનિપ્રચારતદાકારરૂપાય યોગેન યોગિન્ ।
નમો હ્યન્નભૂતાય સર્વાકરાય કલાનન્તરૂપાય પુષ્ટિપ્રદાય ॥ ૭॥

નમો ભૂમિરૂપાય નાનાપ્રભેદધરાયાથ ધારાય નિત્યાય તેઽસ્તુ ।
જલાધિસ્વરૂપાય તૃપ્તિપ્રદાય તદાકારહીનાય સારાય ધામ્ને ॥ ૮॥

નમસ્તેજસાં દ્યોતરૂપાય ઢુણ્ઢે પ્રકાશાય ભોક્ત્રે ચ સર્વસ્થિતાય ।
નમો વાયુરૂપાય તે ચાલકાય પ્રચારસ્વરૂપાય ભિન્નાય તસ્માત્ ॥ ૯॥

નમઃ સ્વસ્વરૂપાય દીપ્તાય પૂર્ણપ્રકાશાય ભૂતાદિકબ્રહ્મદાત્રે ।
નમઃ સ્થૂલભોગસ્વરૂપાય જાગ્રન્મયાય પ્રભો રાજસાયાથ તેઽસ્તુ ॥ ૧૦॥

નમઃ સ્વપ્નમાયામયાયાપિ સૂક્ષ્મસ્વરૂપાય સર્વાન્તરે સંસ્થિતાય ।
નમઃ કારણાયોભયબ્રહ્મદાય સમાયાપિ સૌષુપ્તભોગિન્નમસ્તે ॥ ૧૧॥

નમશ્ચેતનાધારરૂપાય તેઽસ્તુ પ્રયત્નપ્રદાય ત્રિભોગપ્રદાય ।
ગુણેશાય ચૈતન્યધારાય તેઽસ્તુ નમો નાદરૂપાય કાલાય ચાત્મન્ ॥ ૧૨॥

નમો બિન્દુરૂપાય વક્રાનનાય નમો દેહમાયાવિહારાય તુભ્યમ્ ।
નમશ્ચિત્સ્વરૂપાય સોઽહંપ્રદાય નિરાકારદેહિસ્વરૂપાય તેઽસ્તુ ॥ ૧૩॥

સદા હ્યેકદન્તાય જન્માતિગાય પરાયાથ શૂન્યાય દૈત્યાન્તકાય ।
મદાદેશ્ચ શત્રો મહાઽઽબુધ્વજાય નમોઽનાદિસિદ્ધાય માયાધરાય ॥ ૧૪॥

નમો જ્ઞાનરૂપાય નાનાવિહારપ્રદાયાથ પૂર્ણાય સર્વત્રગાય ।
નમો માયિમાયાદિભેદાકરાય સદા બોધરૂપાય તે વૈ મહાત્મન્ ॥ ૧૫॥

નમઃ સાઙ્ખ્યરૂપાય વૈ દેહિનાં વૈ પરાય સ્વસમ્ભોગહીનાય દેવ ।
સદા કેવલબ્રહ્મભૂતાય તેઽસ્તુ નમો જ્ઞાનહીનાય મેધામયાય ॥ ૧૬॥

નમઃ સ્વસ્વરૂપાય ચાનન્દદાય સમાધિસ્વરૂપાય મૌનાત્મકાય ।
સ્વસંવેદ્યયોગેન લભ્યાય તેઽસ્તુ વિનાત્મપ્રબોધાય સર્વાધિપાય ॥ ૧૭॥

નમઃ પઞ્ચપઞ્ચાદિમાયાકરાય ચતુર્ધા ચતુર્ધા વિભિન્નાય ધર્મિન્ ।
અસદ્રૂપકાયાઽથ શક્ત્યાત્મકાય નમોઽભેદભેદાદિનાનાત્મકાય ॥ ૧૮॥

નમઃ સત્સ્વરૂપાય સૂર્યાત્મકાય સદાત્મપ્રબોધાય માયાધરાય ।
અખણ્ડામૃતાયાદ્વિતીયાય તેઽસ્તુ સદા કાલકાલાય મોક્ષપ્રદાય ॥ ૧૯॥

નમો વિષ્ણુરૂપાય ચાનન્દદાય સમાય સ્વમાયોભયસ્રષ્ટ્ર એવ ।
અનન્તાય ભેદાદિહીનાય ભૃમ્ને સદા ભેદરૂપાય સર્વાત્મકાય ॥ ૨૦॥

નમઃ શમ્ભુરૂપાય નેતિપ્રદાય સદા મોહહીનાય ચ ત્ર્યમ્બકાય ।
ત્રિધા માયયા ભાસિતુર્યસ્વરૂપપરબ્રહ્મરૂપાય તે ધૂમ્રવર્ણ ॥ ૨૧॥

ચતુર્ણામભેદાય સંયોગકારિન્ સ્વસંવેદ્યભાવેન વિઘ્નાધિપાય ।
સ્વભક્તસ્ય પક્ષે સદા સંસ્થિતાય ગણાધીશ હન્ત્રે મહાદૈત્યકાનામ્ ॥ ૨૨॥

નમઃ કર્મરૂપાય કર્માદિકર્ત્રે જનાનાં સ્વકર્માદિના ભોગદાત્રે ।
નમો જ્ઞાનરૂપાય નિઃસઙ્ગદાય સદા કર્મહીનાય તે કેવલાય ॥ ૨૩॥

નમસ્તે સમાનપ્રદાયોભયાય સમાયાઽથ યોગેન ચાનન્દદાય ।
નમઃ સાહજબ્રહ્મભૂયપ્રદાય ત્રિધામ્ને ત્રિહીનાય સન્તોષદાય ॥ ૨૪॥

ચતુર્ધા સ્થિતીનાં સદા પાલકાય નિજાત્મસ્વરૂપાય સંયોગકાગ્નિ ।
અપારાય નાના ચતુર્ણાં સમૂહેષ્વધીશાય હેરમ્બ તુભ્યં નમસ્તે ॥ ૨૫॥

અયોગાય માયાવિહીનાય તુભ્યં નમસ્તે નિરાનન્દરૂપાય નિત્યમ્ ।
નિવૃત્તિસ્વરૂપાય ભિન્નાય તેઽસ્તુ નમો યોગરૂપાસમાધિસ્થિતાય ॥ ૨૬॥

નમો યોગશાન્તિસ્વરૂપાય શાન્તિપ્રદાત્રે ગણેશાય યોગાય તુભ્યમ્ ।
સદા બ્રહ્મણાં બ્રહ્મદાત્રેઽખિલેશ ગણાનાં પતે જ્યેષ્ઠરાજાય તેઽસ્તુ ॥ ૨૭॥

નમો બ્રહ્મણે સૃષ્ટિકર્ત્રે સદા વૈ રજોધારિણે વેદશાસ્ત્રાદિકર્ત્રે ।
સદા સૃષ્ટિહીનાય સામ્યાય ધામ્ને નમો માયિને મધ્યવૃત્તિસ્થિતાય ॥ ૨૮॥

નમઃ સત્વરૂપાય વિષ્ણુપ્રભેદાજ્જગત્પાલકાયાથ માયાધરાય ।
નમઃ સત્ત્વહીનાય સર્વાતિગાય કવીનાં પતે વિઘ્નહન્ત્રે નમસ્તે ॥ ૨૯॥

નમસ્તામસાયાઽથ સંહારકર્ત્રે ત્રિનેત્રપ્રદીપાય શક્તેર્ધરાય ।
સદા કાલરૂપાય કૈલાસદાય તમોહીનરૂપાય લમ્બોદરાય ॥ ૩૦॥

નમઃ કર્મણાં મૂલબીજાય તેઽસ્તુ નમો ભાનુરૂપાય તેજોમયાય ।
ત્રિકાલાદિબોધાય સૂર્યાય ભૂમ્ને પ્રકાશૈર્વિહીનાય હેરમ્બ તેઽસ્તુ ॥ ૩૧॥

નમઃ શક્તિરૂપાય મોહપ્રદાય ક્રિયાધારભૂતાય નાનાભ્રમાય ।
અનન્તસ્વરૂપાધિલીલાધરાય નમઃ શક્તિહીનાય સિદ્ધીશ તુભ્યમ્ ॥ ૩૨॥

નમશ્ચન્દ્રરૂપાય પુષ્ટિપ્રદાય કલાભિસ્ત્રિલોકસ્થભૂતાદિકેભ્યઃ ।
સુધાધારકાયાઽથ નક્ષત્રકાદિપ્રકાશાય તે હ્યન્નહીનાય ઢુણ્ઢે ॥ ૩૩॥

નમઃ કામરૂપાય કામારયે તે નમસ્તે ગજાકારતુણ્ડાય તુભ્યમ્ ।
હરીન્દ્રાદિદેવૈઃ સદા સંસ્તુતાય શુકાદ્યૈર્મહદ્ભિશ્ચ વન્દ્યાય તેઽસ્તુ ॥ ૩૪॥

અનિત્યાય નિત્યાય દેવેશ દેવ સકામાય નિષ્કામભાવપ્રદાય ।
સદા સર્વપૂજ્યાય સર્વાધિપાય જલેશેન્દ્રશેષાદિભિઃ સંસ્તુતાય ॥ ૩૫॥

નમઃ કાશ્યપાયાઽથ વૈ કાપિલાય વરેણ્યસ્ય પુત્રાય પારાશરાય ।
નમઃ શમ્ભુપુત્રાય પાર્શ્વાત્મજાય નમો ભક્તિભોક્ત્રે ગણાધીશ તેઽસ્તુ ॥ ૩૬॥

નમો માધવસ્ત્રીસુતાયાઽથ તુભ્યં નમઃ સર્વમાત્રે નમઃ સર્વપિત્રે ।

નમઃ સર્વપુત્રાય સર્વાત્મકાય નમઃ સર્વસર્વાય નાનામયાય ॥ ૩૭॥

નમઃ પાશધારિન્ નમો દન્તધારિન્ સૃણિં બિભૃતે વૈ સદાનન્દદાયિન્ ।
નમઃ પુત્રપૌત્રાદિ રાજ્યપ્રદાત્રે નમો ભુક્તિમુક્તિપ્રદાયાઽથ તુભ્યમ્ ॥ ૩૮॥

નમોઽનન્તશક્તે ગુણાનામધીશ મયૂરેશ યોગેશ માયેશ તુભ્યમ્ ।
નમોઽવ્યક્તસુવ્યક્તરૂપાય દન્તિન્ ગજાકારસાકારમોહાય તેઽસ્તુ ॥ ૩૯॥

નમો હ્યેકરૂપાય નાનાપ્રભેદાદયે વિઘ્નપાલાય શુણ્ડાધરાય ।
અનાથાય નાથાય દેવાદિકાનાં નિવાસાય સર્વાત્મનાં તે નમો વૈ ॥ ૪૦॥

નમસ્ત્વંપદાકારદેહાય તુભ્યં નમસ્તત્પદાકારતુણ્ડાય તેઽસ્તુ ।
તયોરેકભાવાઽસિરૂપપ્રયુક્તશરીરાય સાક્ષાત્ સુધામ્ને નમસ્તે ॥ ૪૧॥

નમો વામભાગેન સિદ્ધિસ્વરૂપાધૃતામોહમાયાજનાનાં જનિત્રી ।
સદા બુદ્ધિરૂપા ધૃતા દક્ષિણાઙ્ગે ન પુંસ્ત્રીસ્વરૂપાઽસિરૂપાય તેઽસ્તુ ॥ ૪૨॥

નમો ભ્રામરી ત્વંપદાધારશક્તિઃ સદા તત્પદા કામદાત્રી હ્યભેદા ।
તયોરેકભાવે સ્વસંવેદ્યનામ્નિ પુરે મસ્તકે વાસકારિંશ્ચ તાસામ્ ॥ ૪૩॥

અખણ્ડામૃતં યત્ર તોયં સુતામ્રં સમુદ્રે સ્થિતં ચેક્ષુસંજ્ઞે નમસ્તે ।
નિરાધારરૂપે ચ પાનેન તસ્ય ન પુંસ્ત્રીપ્રદાયાઽત્ર ખેલંશ્ચ તેઽસ્તુ ॥ ૪૪॥

જનાનાં સદા ત્ર્યક્ષરં શ◌ૃણ્વતાં ચ ગણેશેતિ ચાનન્દદાયિન્નમસ્તે ।
સકૃજ્જલ્પતાં જન્મમૃત્યૂ ન તેષામપારપ્રધામ્ને ચ ઢુણ્ઢીશ્વરાય ॥ ૪૫॥

તવોપાસકા બ્રહ્મભૂતા ન ચિત્રં જનેભ્યશ્ચ સંસ્પર્શનૈર્બ્રહ્મદા વૈ ।
સુરેન્દ્રાદિપૂજ્યા ગણેશસ્વરૂપા ભવયુર્નમસ્તે નમસ્તે ગણેશ ॥ ૪૬॥

સૂત ઉવાચ ।
ઇતિ સ્તુત્વા ગણેશાનં મુદ્ગલો મૌનધારકઃ ।
પાદૌ ધૃત્વા ગણેશસ્ય પતિતો દણ્ડવત્ ક્ષિતૌ ॥ ૪૭॥

સમુત્થાપ્ય સ્વભક્તં તં સસ્વજે પરમાદરાત્ ।
ગજાનનઃ પ્રસન્નાત્મા તમુવાચ મહામુનિમ્ ॥ ૪૮॥

ગણેશ ઉવાચ ।
ત્વયા સ્તોત્રં કૃતં યચ્ચ મદીયં મમ સન્નિધૌ ।
સ્તોત્રોત્તમં પ્રવિખ્યાતં ભવિષ્યતિ ન સંશયઃ ॥ ૪૯॥

સ્તોત્રોત્તમેન માં સ્તૌતિ તસ્મૈ મુક્તિં સભુક્તિકામ્ ।

દદામિ દૃઢભક્તિં ચ મદીયાં નાત્ર સંશયઃ ॥ ૫૦॥

ન સઙ્કટં ન રોગં ચ પ્રાપ્નોતિ સ નરોત્તમઃ ।
પુત્રપૌત્રાદિકં સર્વં ધનં ધાન્યં દદામિ વૈ ॥ ૫૧॥

મારણોચ્ચાટનાદીનિ નશ્યન્તિ પઠનેન ચ ।
એકવિંશતિવારં ચ તથા નાવદ્દિનાવધિ ॥ ૫૨॥

કારાગૃહાદિજાઃ પીડા નશ્યન્તિ પઠનેન ચ ।
મનસેપ્સિતમાપ્નોતિ નરો મે પરમપ્રિયઃ ॥ ૫૩॥

ત્વં તુ મત્તો વરાન્ બ્રૂહિ દાસ્યેઽહં ભક્તિયન્ત્રિતઃ ।
ત્વત્સમો નાસ્તિ ભાવજ્ઞો વશે તેઽહં સદા સ્થિતઃ ॥ ૫૪॥

ઇતિ શ્રીમુદ્ગલકૃતા ગણેશસ્તુતિઃ સમાપ્તા । ૧.૨૧

---

*Ganesha Stuti by Mudgala*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*